वस्त्रमुख्यलङ्कारं
धृतमुख्यन्तु भोजनम् ।
गुणमुख्यन्तु नारीणां
विद्या मुख्यास्तु पण्डिताः ।।

ॐ
# ज्वाला
संस्कृतवार्तापत्रिक

जयतु भारतं
जयतु संस्कृतम्।

२०१२ मार्च् ८ शनिवारः विवेक सागर माध्यमिकविद्यालयं वेल्लरक़्काट् , पुटः २
कुम्भम् २८ संस्कृतसंघः

## संस्कृतसंघं रूपीकृतम्

वेल्लरक़्काट् : मरत्तंकोट् माध्यमिकविद्यालये जूण् मासे बुधवासारे संस्कृतसंघं रूपीकरणम् अभवत् । प्रधान अध्यापिका दाक्षायणी महाभागा संघस्य उद्घाटनम् कृतवन्तः ।

### ध्येयवाक्यानि

| | |
|---|---|
| सत्यमेव जयते | - भारतशासनम् |
| विद्ययाऽमृतमश्नुते | -एन् .सि . इ . आर् . टि |
| मृदुभावे दृढकृत्ये | -केरला आरक्षकसेना |
| सत्यं शिवं सुन्दरम् | -दूर्शनम् |

## उपजिल्ला कलोत्सवे प्रशस्तविजयम्

वेल्लरक़्काट् : - २०१२ नवंम्बर् मासे कुन्नंकुलं उच्चविद्यालये प्रचलिता उपजिल्ला विद्यालयीय कलोत्सवे संस्कृतोत्सवे अस्मिन् विद्यालयं प्रथमस्थानं आवहत्। अरबिक् कलोत्सवे बालकलोत्सवे च श्लाघनीय स्थानं अलभन्।

आतिरा

उत्तमअभिनेत्री कथा रचयिता च

डल्ना सेवियर्

समस्यापूरणम्

सान्द्र

गान्धि दर्शन् चित्र रचना मत्सरविजयी



## संस्कृत दिनाचरणम्

वेल्लरक़्काट् : वेल्लरक़्काट् माध्यमिकविद्यालये आगस्ट् मासे सप्तमदिने संस्कृत दिनाचरणं समुचितरीत्या आचरितम् । विशेष्यविद्यालयसभायां प्रार्थना , प्रतिज्ञा प्रभाषणम् च संस्कृतभाषायां एव आसन् ।तस्मिन्नेव अवसरे कथाकेल्आिचार्यःश्री.दामोदरन् महाशयः नवरसप्रकटनमपि अकरोत् । एस् आर् जि अध्यक्ष जान्सी महाभागा आशंसा भाषणं कृतवती।

## यात्रा मङ्गलम्


श्रीमती.दाक्षायणी


श्रीमती.षीला


श्रीमती. आनी

वेल्लरक़्काट् : ३१ .३ .२०१२ शनिवासरे अस्मिन् विद्यालये दीर्घकालसेवनानन्तरम् अध्यापने विरमतः प्रधान अध्यापिका श्रीमती.दाक्षायणी महाभागा, श्रीमती. आनी महाभागा, श्रीमती. षीला महाभागाया च ।

**` संस्कृतसंघस्य आशंसाः**

## अनुमोदनम्



के. पि. एस्. डि. यु अध्यापकसंघडनायां नेतृत्वे अध्यापकानां कृते प्रचलिता कविता रचना स्पर्धसु प्रथमस्थानं लब्धवती श्रीमती. पत्मिनी महाभागाय संस्कृसंघस्य अनुमोदनम् अर्पयामः।

## उद्घोषणम्

भो सुहृदः ,
श्रुण्वन्तु श्रुण्वन्तु सर्वे ,
संस्कृत संघस्य अध्यक्षः विज्ञापयति
टुम्.... टुम् .....टुम्.....टुम् ......
अस्माकं संस्कृत संघस्य वार्तापत्रिकायाः
प्रकाशनं प्रकाशनं ०८. ३. २०१२ शुक्रवासरे
भविष्यति । टुम् ...टुम् ...टुम् .विद्यालयसभायां
श्रीमती. दाक्षायणी महाभागाप्रकाशनकर्म करिष्यति।
टुम्....टुम्.....टुम्......।

## उपजिल्ला शास्त्र गणितशास्त्र सामूह्य प्रवृत्तिपरिचय स्पर्धायां प्रशस्तविजयम् ।

वेल्लरक़्काट् : कुन्नंकुलं उपजिल्ला शास्त्र गणितशास्त्रस्पर्धायां गणित संङ्गोष्ठी अवतरणे द्वितीयस्थानं सामूह्यशास्त्र मेलायां प्रवर्त्तनवस्तु प्रदर्शनमत्सरे द्वितीयस्थानं ए ग्रैट् च अलभन् ।





### समस्या पूरणम्

संस्कृतं पठनं मम लक्ष्यम्
संसकृत वृद्धि मम लक्ष्यम्।
संस्कृत संस्ति वृद्द्या शोभन
मोदकजीवनमति सुखदम्।।

डेलना सेवियर्

### उपजिल्ला बुल् बुल् उत्सवे अस्मिन् विद्यालयं प्रथमस्थानं



### व्याघ्रायता

एकस्मिन् देवदत्तः नाम ग्रामे कश्चन काष्ठविक्रेता आसीत्। भक्तिमान् सः प्रतिदिनं देवालयं गच्छति।तदनन्तरमेव काननं गत्वा काष्ठानि सङ्गृह्य तानि विक्रीय तस्मात् जीवनपायनं करोति स्म। एकदा वने अटनसमये तेन कश्चन शृगालः दृष्टः। सः च वृद्धः। भोजनाय मृगान् मारयितुम् अपि अक्षमः। तस्य दर्शनात् देवदत्ते कारुण्यम् उत्पन्नम्। तस्मिन्नेव समये कश्चन व्याघ्रः तत्र आगतः। तं व्याघ्रं दृष्ट्वा भीतः देवदत्तः समीपस्थं काञ्चित् वृक्षम् आरूढवान्। सः व्याघ्रः मृगमेवं मारयित्वा खादित्वा पूर्णोदरः भूत्वा अवशेषं तत्रैव परित्यज्य गतः। तदन्तरं शृगालः तच्छेषं यथेष्टं खादितवान्, तृप्तः अभवत् च।

इदं सर्वं विलोकितवान् देवदत्तः अचिन्तयत् - वृद्धाय तस्मै शृगालाय अपि परमेश्वरः काले आहारं ददाति। किं महाभक्ताय मह्यं न दद्यात्? अहं प्रतिदिनं देवमन्दिरं गच्छामि कुतो वा मया आतपे वृष्टिकाले च प्रयासः करणीयः? काष्ठानि किमर्थं सङ्ग्रहणीयानि? एतां वृत्तिं त्यजामि। भगवान् एव मह्यम् अपि आहारं व्यवस्थापयिष्यति' इति।

ततः परं सः कदाचिदपि आरण्यं न गतः। 'भगवान् मम निमित्तम् अन्नपानादिव्यवस्थाम् अवश्यं करिष्यति'।इति चिन्तयन् सः परशूम् अपि त्यक्तवान्। द्वित्राणि दिनानि अतीतानि। तथापि खादितुम् किमपि न प्राप्तम्। बुभुक्षापिपासाभ्यां बहुधा पीडितः सः क्रुद्धः सन् मन्दिरं गत्वा देवं दृष्ट्वा उक्तवान् " हे प्रभो ! कुतः मामं एवं परीक्षते भवान् ? शृगालाय आहारं दत्तवतः भवतः कारुण्यं दृष्ट्वा मया विश्वासः कृतः यत् भवान् सर्वेभ्यः अपि आहारं व्यवस्थापयिष्यति इति। किन्तु भवान् मां दुःखगर्ते पतितवान्। दिनत्रयतः मया आहारः न प्राप्तः। किम् एतत् उचितम् ?" इति। तदा तत्र प्रत्यक्षीभूतः भगवान् उक्तवान् -" रे मूढ! भवान् शृगालयते। तत् न उचितम्। व्याघ्रः स्मर्यताम्। व्याघ्रः किम् आहाराय प्रयत्नं न अकरोत्? व्याघ्रवत् एव प्रयत्नेन आहारः प्राप्यताम्। तदेव उचितम्" इति। ततः आरभ्य देवदत्तः उद्योगपरः अभवत्।

आतिरा पि. एच्च्



एल्ल्. एस्. एस्. स्कोलर्षिप्प्
विजयि विबिन् के.वि

DTP Sailaja.9495503770 Printed & published Sanskrit club V.S.U.P.School Vellarakksd .(For privet Circulation Only)